
लोकभाषाप्रचारसमितेः मासिकं मुखपत्रम्

# लोकभाषासुश्रीः

The Monthly news magazine of a National Movement - LOKABHASHA SHUSHREE

सरस्वतीविहारः, बरपदा, भद्रक - ७५६१११३ स्वर्गद्वार, पुरी-७५२००१

आषाढः शकाब्दः - १९४७, युगाब्दः ५१२६, जुन-२०२५



Email : lokaprajna@gmail.com,
Website : www.lokabhasha.org

## ओडिशाराज्ये आस्कास्थिते मेकमाइकलसंस्कृतमहाविद्यालये

## संस्कृत-विद्यार्थि-दक्षता-विकाश-प्रशिक्षणशिविरम्

### दिनांकः १७-०६-२०२५ तः २६-०६-२०२५ पर्यन्तम्





लोकभाषाप्रचारसमितिपक्षतः केन्द्रीयसंस्कृतविश्वविद्यालय-नवदेहलीत्यस्य सहयोगेन संस्कृतविद्यार्थिनां बहुविधदक्षताभिबृद्धये दशदिनात्मक-दक्षता-विकाश-प्रशिक्षण शिविरस्य उद्घाटन समारोहः ओडिशाराज्ये आस्कास्थिते मेकमाइकल



संस्कृतमहाविद्यालये सुसम्पन्नः। विश्वदरवारे संस्कृतभाषायाः स्वतन्त्रपरिचयो विद्यते। अस्माकं वेद-उपनिषद-विविधशास्त्रपुराण-प्राचीनग्रन्थाः संस्कृतभाषया विरचिताः। अनया भाषया अस्माकं संस्कृतिः परिपुष्टा।

सर्वप्रथमं मुख्यातिथिः वेदवाचस्पतिः प्रो. उमेशप्रकाशदाशः दीपप्रज्वलनं कृतवन्तः। महाविद्यालयस्य संस्कृतविभागाध्यक्षः कार्यक्रमसंयोजकः डॉ. सनातन पंडा, स्वागतभाषणं कृतवान्। सभाध्यक्षः डॉ. अश्विनि कुमार दाश, संस्कृत महाविद्यालयस्य अध्यक्षः सभां सम्बोधयन् कथितवान् यत् नूतनशिक्षानीति-२०२०मध्ये भारतीयज्ञानपरम्परायाः महत्त्वं क्रमशः बर्द्धते। भारतीयज्ञानस्याधारः संस्कृतमेवास्ति। अतः सर्वैः भारतीयैः संस्कृतमवश्यमेव पठनीयम्। समितेः राष्ट्रि महासचिवः डॉ. विभूति नारायण करः प्रोक्तवान् यत् संस्कृतभाषा भारतस्यात्मास्ति। भारतं विश्वगुरुपदे प्रतिष्टापयितुं समितेः ४५तमवर्षस्य सफलतां वर्णितवान्। मुख्यप्रशिक्षकः समितेः राज्योपाध्यक्षः श्री लक्ष्मीधर बेहेरा, संस्कृत-दक्षता-विकास-कार्यक्रमस्य स्वरूपं सरलसंस्कृतेन समुपस्थापितवान। ओडिशा राज्यस्य समितेः सचिवः ड. बाबानाथ मिश्रः स्वरचित कवितया संस्कृतस्य महत्त्वं प्रतिपादितवान्। शिविरेऽस्मिन्






ओडिशा राज्यस्य महाविद्यालय-विश्वविद्यालयेभ्यः ४० प्रशिक्षणार्थिनः भागं स्वीकुर्वन्तीति महासचिवः श्रीबिभूतिनारायणकरः सूचितवान्। मंगलाचरणं शिशिर कुमार



मिश्रः। अध्यापकः मनोरंजन साहु सभासंचालनं तथा धन्यवादार्पणं कृतवान्।

शिविरमिदं प्रातः ५:००वादनतः आरभ्य रात्रिः१०:०० वादनपर्यन्तं प्रचलति स्म। प्रातःस्मरणं श्री विश्वनाथ महापात्रः



सम्भाषणवर्गं गीतापाठं योगाभ्यासकक्षां च श्री बाबानाथ मिश्रः व्याकरणवर्गं श्री लक्ष्मीधर बेहेराः, पाठनाभ्यासं श्री काह्नुचरण प्रधानः, च संचालितवन्तः। सांघटनिकचर्च्चा प्रेरणादायिनी आसीत्। संस्कृतक्रीडा–रसप्रश्नैश्च छात्राणां मनोरञ्जनं प्रशिक्षकैः संपादितम्।

मातृकाविज्ञानप्रशिक्षणम् - मातृकाविज्ञानविशेषज्ञ श्री विश्वनाथ महापात्रःमहाभागा मातृकाविज्ञानशिक्षणं प्रशिक्षणार्थिभ्यः सुचारुतया आभासिमाध्यमेन शिक्षितवान। वस्तुतः छात्राः बहूपकृताः।

दक्षता-विकाश-प्रशिक्षणशिविरस्य उद्घाटनसमारोहे , विशिष्टवक्तारः पण्डित वाल्मीकिहोता, अध्यापकः हेमन्तकुमार गन्तायतः, डॉ. नरेन्द्रकुमार दाशप्रमुखाः संस्कृतस्य व्यावहारिकप्रयोजनविषये सभां सम्बोधितवन्तः।



शिविरेऽस्मिन् संस्कृतसम्भाषण-व्यावहारिकव्याकरण-संस्कृतगीतगायन-संस्कृतशिक्षणप्रशिक्षण-योगशिक्षा-विविधदक्षतावृद्धिकार्यक्रमाः समायोजिताः।


## समापनसमारोहः २६.०५.२०२५



समारोहेऽस्मिन् छात्राणां दक्षताविकाशाय समागताः अतिथयः दिग्दर्शनं कृतवन्तः। मुख्यातिथिः आञ्चलिक-उच्चशिक्षानिदेशकः डॉ.सिद्धार्थशंकरपाढी, मुख्यवक्ता



लोकभाषाप्रचारसमितेः राष्ट्रियोपाध्यक्षः डॉ.विपिनविहारी शतपथी, सम्मानीतितिथिरूपेण उच्चशिक्षा-उपनिदेशकौ डॉ.कुलमणि ओझा डॉ.सुशान्तदाशश्च, रामाधीनसंस्कृतमहा





विद्यालयस्य अध्यक्षः डॉ. हरिहरदाशः, शिक्षावित् कृष्णचन्द्रनायकप्रमुखाः समुपस्थिताः सन्तः अद्यत्वे विविधक्षेत्रेषु संस्कृतस्यावश्यकताविषये सम्यक् सूचनां प्रदत्तवन्तः। समग्रे विश्वेऽस्मिन् वेदादिशास्त्र-योग-वास्तु-चिकित्साशास्त्राणामादरः प्रतिदिनं वर्धते। पुनः संस्कृतभाषायां प्रकाशितानि नीतिशास्त्राणि सर्वेभ्यो मानवेभ्यः सम्यग् दिग्दर्शनं ददति। अतः सर्वक्षेत्रेषु छात्राणां दक्षतावृद्धये संस्कृतस्य भूमिका स्वीकरणीयैव। समारोहेऽस्मिन् महाविद्यालयस्य अध्यक्षः अश्विनीकुमार दाशः पौरोहित्यं कृतवान्। श्रीवद्रिनारायण षडंगी वेदपाठम्, शिविरछात्राः स्वागतगीतम्, अध्यापकः शिशिरकुमारमिश्रश्च स्वागतभाषणं कृतवन्तः। ओडिशा राज्यशाखाध्यक्षः पंडित गोपालकृष्ण पाढी सर्वेभ्यः कृतज्ञता समर्पणं कृतवान्।





## ଆସ୍କାରେ ସଂସ୍କୃତ ପ୍ରଶିକ୍ଷଣ ଶିବିରର ଉଦ୍ଘାଟନ ଉତ୍ସବ



ଆସିକା,୧୯।୬(ଆନିସ): ସ୍ଥାନୀୟ ମେକ୍ ମାଇକେଲ୍ ସଂସ୍କୃତ ମହାବିଦ୍ୟାଳୟ ପରିସରରେ ଲୋକଭାଷା ପ୍ରଚାର ସମିତି ପକ୍ଷରୁ ତା୧୭/୬/୨୫ ରୁ ୨୬/୬/୨୫ରିଖ ପର୍ଯ୍ୟନ୍ତ ଦଶଦିନାତ୍ମକ ସଂସ୍କୃତ ପ୍ରଶିକ୍ଷଣ ଶିବିରର ଉଦ୍ଘାଟନ ଉତ୍ସବ ଛାତ୍ର ଛାତ୍ରୀମାନଙ୍କ ଦକ୍ଷତା ବୃଦ୍ଧି ପାଇଁ ଅନୁଷ୍ଠିତ ହୋଇଯାଇଛି । ଏହି ଉତ୍ସବରେ ମହାବିଦ୍ୟାଳୟର ଅଧ୍ୟକ୍ଷ ଶ୍ରୀଅଶ୍ୱିନୀ କୁମାର ଦାଶ ସଭାପତିତ୍ୱ କରିଥିବା ବେଳେ ଉଦ୍ଘାଟକ ତଥା ମୁଖ୍ୟବକ୍ତା ରୂପେ ବେଦ ବାଚସ୍ପତି ପ୍ରୋ .ଉମେଶ ପ୍ରସାଦ ଦାଶ ଯୋଗ ଦେଇ କହିଥିଲେ ଯେ , ସଂସ୍କୃତ ଭାଷା ହେଉଛି ସଂସ୍କୃତିର ରକ୍ଷକ। ଏକ ସୁସ୍ଥ ସମାଜ ଗଠନ ଦିଗରେ ଉକ୍ତ ମହାବିଦ୍ୟାଳୟରେ ପ୍ରଶିକ୍ଷଣ ନେଉଥିବା ଛାତ୍ରଛାତ୍ରୀମାନେ ଭବିଷ୍ୟତରେ ଜଣେ ଜଣେ ମାଇଲଖୁଣ୍ଟ ହୋଇ ସମାଜକୁ ସୁଦିଗ ଦର୍ଶନ ଦେଇପାରିବେ ଏବଂ ପରିଶ୍ରମ ହିଁ ସଫଳତାର ଚାବିକାଠି ବୋଲି ସଭାପତି ମିଶ୍ର ବକ୍ତବ୍ୟ ରଖିଥିଲେ । ସମିତିର ରାଷ୍ଟ୍ରୀୟ ମହାସଚିବ ଶ୍ରୀବିଭୂତି ନାରାୟଣ କର, ବର୍ଗାଧିକାରୀ ଅଧ୍ୟାପକ ଶ୍ରୀଲକ୍ଷ୍ମୀଧର ବେହେରା ଏବଂ କେନ୍ଦ୍ରୀୟ ପ୍ରଚାରକ ଶ୍ରୀମାନ କାହ୍ନୁଚରଣ ପ୍ରଧାନ ସରଳ ଅନର୍ଗଳ ସଂସ୍କୃତ ସମ୍ଭାଷଣ ସହ ଅଭିନୟ ଓ ଗୀତ ମାଧ୍ୟମରେ ପ୍ରଶିକ୍ଷଣ ପ୍ରଦାନ କରିଥିଲେ । ବରିଷ୍ଠ ବ୍ୟାକରଣ ଅଧ୍ୟାପକ ତଥା ଗଞ୍ଜାମ ଜିଲ୍ଲାର ସମିତି ସଭାପତି ଶ୍ରୀସନାତନ ପଣ୍ଡା ସ୍ୱାଗତ ଭାଷଣ ରଖିଥିବା ବେଳେ ସଭା ପରିଚାଳନା କରିଥିଲେ ବରିଷ୍ଠ ବ୍ୟାକରଣ ଅଧ୍ୟାପକ ଶ୍ରୀବାବାନାଥ ମିଶ୍ର । ସମ୍ମାନୀତ ଅତିଥି ରୂପେ ବରିଷ୍ଠ ଅଧ୍ୟାପକ ମନୋରଞ୍ଜନ ସାହୁ, ଡଃ. ନରେନ୍ଦ୍ର କୁମାର ଦାଶ, ଶିଶିର କୁମାର ମିଶ୍ର ଓ ବାଲ୍ମୀକି ହୋତା ସଂସ୍କୃତ ଭାଷାର ମହତ୍ ଉପରେ ନିଜ ନିଜର ମତ ରଖିଥିଲେ। ଡଃ. ଘନଶ୍ୟାମ ମିଶ୍ର ସଂସ୍କୃତ ମହାବିଦ୍ୟାଳୟର ଦର୍ଶନ ବିଭାଗାଦକ୍ଷ ଅଧ୍ୟାପକ ଶ୍ରୀହେମନ୍ତ କୁମାର ଗନ୍ତାୟତ ସଂସ୍କୃତ ଭାଷା ବିଜ୍ଞାନ ପାଇଁ ବରଦାନ କହିବା ସହ ଧନ୍ୟବାଦ ଅର୍ପଣ କରିଥିବା ବେଳେ ଉକ୍ତ ମହାବିଦ୍ୟାଳୟର ଛାତ୍ର ଶ୍ରୀମାନ ଚିନ୍ମୟା ନନ୍ଦ ବେଦ ପାଠ କରିଥିଲେ। ଏହି ଶିବିରରେ ପଚାଶରୁ ଉର୍ଦ୍ଧ୍ୱ ଛାତ୍ରଛାତ୍ରୀ ଏବଂ ସ୍ଥାନୀୟ ମାନ୍ୟଗଣ୍ୟ ବ୍ୟକ୍ତିମାନେ ଉପସ୍ଥିତ ଥିଲେ।

## ସଂସ୍କୃତ ବିଦ୍ୟାର୍ଥୀଙ୍କ ପ୍ରଶିକ୍ଷଣ ଶିବିର ଉଦ୍‌ଯାପିତ



ଆସିକା, ୨୬।୬(ଆପ୍ର): ଆସିକା ମେକ୍ ମାଇକେଲ ସଂସ୍କୃତ ମହାବିଦ୍ୟାଳୟ ଠାରେ ସଂସ୍କୃତ ବିଦ୍ୟାର୍ଥୀଙ୍କ ୧୦ ଦିନିଆ ଦକ୍ଷତା ବିକାଶ ପ୍ରଶିକ୍ଷଣ ଶିବିର ଉଦ୍‌ଯାପିତ ହୋଇଛି। ମହାବିଦ୍ୟାଳୟର ଅଧ୍ୟକ୍ଷ ଅଶ୍ୱିନୀ ଦାଶଙ୍କ ଅଧ୍ୟକ୍ଷତାରେ ଆଞ୍ଚଳିକ ଉଚ୍ଚ ଶିକ୍ଷା ନିର୍ଦ୍ଦେଶକ ଡ. ସିଦ୍ଧାର୍ଥ ଶଙ୍କର ପାଢ଼ୀ, ଡ. ବିପିନ ବିହାରୀ ଶତପଥି, ଉଚ୍ଚ ଶିକ୍ଷା ଉପନିର୍ଦ୍ଦେଶକ ଡ. କୃଳମଣି ଓଝା, ଡ. ସୁଶାନ୍ତ ଦାସ, ରାମାଧୀନ ସଂସ୍କୃତ ମହାବିଦ୍ୟାଳୟ ଅଧ୍ୟକ୍ଷ ଡ. ହରିହର ଦାଶ, ଶିକ୍ଷାବିତ କୃଷ୍ଣ ଚନ୍ଦ୍ର ନାୟକ ଉପସ୍ଥିତ ଥିଲେ। ସଂସ୍କୃତ ଶିକ୍ଷକ ସନାତନ ପଣ୍ଡା ସଂଯୋଜନା କରିଥିଲେ। ଆଜି ଆରମ୍ଭରୁ ସଂସ୍କୃତ ସମ୍ଭାଷଣ, ବ୍ୟାବହାରିକ ବ୍ୟାକରଣ, ସଂସ୍କୃତ ଗୀତ ଗାୟନ, ସଂସ୍କୃତରେ ଭାଷଣ ଶୈଳୀ, ଯୋଗ ଶିକ୍ଷା, ବୌଦ୍ଧିକ ଶିକ୍ଷ ଉପରେ ପ୍ରଶିକ୍ଷଣ ପ୍ରଦାନ କରାଯାଇଥିଲା। ଛାତ୍ରଛାତ୍ରୀ ମାନଙ୍କ ନୈତିକ ଓ ବୌଦ୍ଧିକ ବିକାଶ କ୍ଷେତ୍ରରେ ସଂସ୍କୃତ ଭାଷାର ଗୁରୁତ୍ୱ ରହିଛି ବୋଲି ବକ୍ତା ମାନେ କହିଥିଲେ। ଏହି କାର୍ଯ୍ୟକ୍ରମରେ ରାଜ୍ୟ ପୁରସ୍କାରପ୍ରାପ୍ତ ପଣ୍ଡିତ ଗୋପାଳ କୃଷ୍ଣ ପାଢ଼ୀ ଧନ୍ୟବାଦ ଦେଇଥିଲେ। କଲେଜର ଅଧ୍ୟାପକ ମନୋରଞ୍ଜନ ସାହୁ, ଅଧ୍ୟାପିକା କବିତା କୁମାରୀ ଦାଶ, ଟୁନା ମହାରଣା ପରିଚାଳନାରେ ସହଯୋଗ କରିଥିଲେ।



**आदर्शयोजनाविभागः**

**संस्कृतसंवर्धनयोजना**

(भारतसर्वकारस्य शिक्षामन्त्रालयस्य केन्द्रीययोजनाः)

संचालकः

**केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली**

संसदः अधिनियमेन स्थापितः

56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली – 110058

जालपृष्ठम् : www.sanskrit.nic.in

**विज्ञापनसंख्या 01/2025** दिनाङ्कः 28.06.2025

## केन्द्रीययोजनानाम् अन्तर्गततया मान्यताप्राप्तेषु विविधेषु आदर्शसंस्कृतमहाविद्यालयेषु (ASMs) प्राचार्यपदस्य नियुक्त्यर्थम् अधिसूचना

संस्कृतसंवर्धनार्थं भारतसर्वकारस्य शिक्षामन्त्रालयेन प्रवर्तमानानां केन्द्रीययोजनानां क्रियान्वयनार्थं केन्द्रीयसंस्कृतविश्वविद्यालयः केन्द्रक-अभिकरण (नोडल एजन्सि)-रूपेण कार्यं करोति। तासु योजनासु **"मान्यताप्राप्तानाम् आदर्शसंस्कृतमहाविद्यालयानाम् (ASMs)/आदर्शसंस्कृतशोधसंस्थानानाम् (ASSSs) कृते वित्तीयसहायतायोजना (संशोधिता आदर्शयोजना – २०२२)"** इत्यनया योजनया राष्ट्रस्य विभिन्नराज्येषु स्थितानां ASMs/ASSSs संस्थानानां कृते वित्तीयसाहाय्यं प्रदीयते। अस्याः योजनायाः अन्तर्गततया आदर्शसंस्कृतमहाविद्यालयत्वेन (ASMs) मान्यताप्राप्तेषु महाविद्यालयेषु अधोलिखितपदानां नियुक्त्यर्थं भारतीयनागरिकेभ्यः सद्यस्क-माध्यमेन (Online) आवेदनं केन्द्रीयसंस्कृतविश्वविद्यालयेन आमन्त्र्यते ।

- **पदस्य नाम – प्राचार्यः (आचार्य-वेतनश्रेणी)**
- **नियुक्तेः प्रकारः – साक्षात् नियुक्तिः**
- **कार्यकालः – यू.जी.सी.-मानदण्डानुसारं पञ्चवर्षीयः कार्यकालः**
- **स्तरः वेतनमानं च – सप्तम-केन्द्रीयवेतन-आयोगानुसारम्, शैक्षणिकस्तरः – 14 (वेतनमानम् – ₹ 1,44,200 – ₹ 2,18,200)**
- **पदानां संख्या – त्रयोदश (13)**
- **सद्यस्क-माध्यमेन पञ्जीकरणस्य/आवेदनस्य प्रारम्भदिनाङ्कः – 28.06.2025 (शनिवासरः)**
- **सद्यस्क-माध्यमेन पञ्जीकरणस्य/आवेदनस्य अन्तिमदिनाङ्कः – 28.07.2025 (सोमवासरः), सायं 06:00 पर्यन्तम्।**

➢ आवेदनप्रक्रिया, सद्यस्क-माध्यमेन (Online) आवेदनपत्रस्य प्राप्तिसूत्रम् (Link), अपेक्षिताः अर्हताः, अनुभवः, सामान्यनियमाः उपबन्धाश्च, आवेदनाय निर्धारितशुल्कम्, हार्ड्कॉपी-प्रेषणम्, विस्तृतविज्ञप्तिः इत्यादीनां सूचनानां कृते केन्द्रीयसंस्कृतविश्वविद्यालयस्य जालपृष्ठे **www.sanskrit.nic.in** इत्यत्र “Recruitment Tab” अवलोकनीयम् ।

**हस्ता/-**

**कुलसचिवः (प्र०)**

Printed & Published by **Bibhuti Narayan Kar**, General Secretary, Lokabhasha Prachara Samitih at Sarasvati Vihar, Barapada Bhadrak, Odisha, Pin: 756113 with financial assistance of Central Sanskrit University, New Delhi

**Chief Editor: Dr. Sadananda Dikshita, Editor: Dr. Niranjan Sahu** `20/- (Annual `200/-)

Mobile: 8917625411, 9439953858 RNI Regd. No. 1811/1997/ORISAN0005

Scanned with OKEN Scanner